बुक-पोस्ट प्रकाशित सामग्री

गुरुकुल पत्रिका । प्रह्लाद । आर्य भट्ट

रजि० संख्या एल० १२७७

17

सेवा में,

व्यवसाय प्रबन्धक
गुरुकुल काँगड़ी विश्वविद्यालय
हरिद्वार

धर्मः परिवेदन इति परकृत्वादत्तक्रीतादयो भ्रातरः सोदर्य्यविषयेऽपि कश्चिद्दोषो नास्ति
तथा च शातातपः क्लीबे देशान्तरस्थे च पतिते भिक्षुकेपि वा योगशास्त्राभियुक्तो विर
क्तेः कात्यायनोपि देशान्तरस्थक्लीबैकवृषणानसहोदरान् वेश्यातिसक्तपतितशू
द्रतुल्यातिरोगिणः जडमूकान्धबधिरकुब्जवामनखोडकान् अतिवृद्धानभार्यांश्च
कृषिसक्तान्नृपस्य च धनवृद्धिप्रसक्तांश्च कामतोकारिणस्तथा कुहकोन्मत्तचोरां
श्च परिविन्दन्न दुष्यतीति बोधायनपादद्वयः अभार्या नैष्ठिकब्रह्मचारिणः कामतोका
रिणः स्वधर्म्येव विवाहान्निवृत्ताः देशान्तरगमनादिषु कालप्रतीक्षामन्तरेण परिवेदने
दोषोस्ति तथा च वसिष्ठः अष्टौ दश द्वादश वर्षाणि भ्रातरमनिविष्टमप्रतीक्षमाणः प्रा
यश्चित्ती भवतीति अनिविष्टमकृतविवाहं अत्रायं व्यवस्था अष्टौ धर्मार्थमर्थार्थं वा
द्वादश वर्षं प्रतीक्षणं देशान्तरगतज्येष्ठविषयं अष्टौ दशेति पक्षद्वयं कार्यान्तरार्थं देशा
न्तरगतविषयं तथा स्मृतिः द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोगतः न्याय्यः प्रतीक्षितुं
भ्राता श्रूयमाणः पुनः पुनरिति क्लीबादयस्तु न प्रतीक्षणीयाः तथा च स्मृतिः उन्म

वाप्यापदि द्विज इति वा गौणस्यस्यापत्कल्पतया विहितत्वात् विहितत्यागकारणं विना
श्रौतस्मार्ताग्निपरित्यागात्त्यक्ताग्निः अल्पवृत्त्याधनं स्वीकृत्याधिकवृत्त्याधनप्रयो
जनको वार्द्धुषिकः तथाच स्मृतिः समर्घं धनमुद्धृत्य महार्घं यः प्रयच्छति स वै वार्द्धु
षिको नाम ब्रह्मवादिषु गर्हित इति यद्यप्ययं रोगी अनापदि पशुपालः अविवा
हिते ज्येष्ठे अनाहिताग्नौ ज्येष्ठे अनाहिताग्नौ वा सति यः कनीयान्कृतदारपरिग्रह आ
हिताग्निर्वा भवेत् स परिवेत्ता तज्ज्येष्ठस्तु परिवित्तिः तथाच मनुः दाराग्निहोत्रसं
योगं कुरुते योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज इति अग्रजः सोद
र्यो विवक्षितः तथाच गर्गः सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहं आवसथ्यं त
थाधानं पतितस्त्वन्यथा भवेदिति आवसथ्यमावसथ्याधानं आधानं गार्हप
त्याधानं असोदर्ये तु न दोषः तथाच शातातपः पितृव्यपुत्राः सापत्नाः परनारी
सुतास्तथा दाराग्निहोत्रसंयोगेन दोषः परिवेदने इति परनारीसुताः क्षेत्रजा भ्रा
तरः यमोऽपि पितृव्यपत्न्यान्सापत्न्यान्परपुत्रांस्तथैव च दाराग्निहोत्रधर्मेषु ना

कुमारी यारजस्वला यस्त्वेनामुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः अश्राद्धेयमपांक्तेयं तं विद्या
द्वृषलीपतिमिति यस्य गृहे जारः सदा संवसेत्सोपि वर्ज्यः तदुक्तं देवलेन परदाराभिगामो
कामुकस्तो जारउच्यते सदा वोपपतिर्ज्ञेयो यः सदा संवसेद्गृह इति वाग्दुष्टो निष्ठुरवाक्य
मितेर्महापातकिसंसर्गिभिः सह ब्राह्मणैर्योनिश्रुसंबंधैर्विद्यायोनिसंबंधैर्यः संयोगंगतः
सोत्र विवक्षितः ननु सा तावत्संसर्गी तस्य पतितशब्देनैवोपात्तत्वात् केकरादोर्द्धदृष्टिः
अग्रेदिधिष्वाः पतिरग्रेदिधिषूपतिः ज्येष्ठायामनूढायामूढा कनिष्ठा या साग्रेदिधिषूः
तदुक्तं देवलेन ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेनुजा सा चाग्रेदिधिषूर्ज्ञेया पूर्
वातु दिधिषूर्मतेति पुत्राचार्यो द्वरपाठकः भ्रामरी वेत्त्यपस्मे व भ्रमरवद्भ्रमीर्ज्जवः ग
ण्डस्वेष्टाकोवर्धकिवन्यावर्त्तमानः उरभ्राग्रवयः तएव वृत्त्यर्थपालनीयायस्यास्मा
वीरभृकः माहिषः पात्न्याप्रस्यासोमहिषिकः अथवा ब्राह्मचारिणीपुत्रः तदाह देव
लः माहिषीत्युच्यते भार्या सा चैव व्यभिचारिणी तस्यां यो जायते गर्भः स वै माहिषकः
स्मृत इति एतान्पूर्वोक्तान्भयत्र दैवे पित्र्ये च वर्जयेदित्यर्थः यस्तोपि कारणः कुण्डाश्च

नः किल्बिषी कुष्ठी पतितः क्लीव एव वा राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुमिति
विदेशस्थप्रव्रजितादिषु तु चिरकालानुवृत्त्या विवाहसंभावनानिवृत्तावाधिवेदनं देयाय
तत्र कालावधौ श्रुतत्वात् आधानविषये पित्र्येष्टानुमत्याधिवेदनेन दोषः तथा च वृद्ध
वसिष्ठः अग्रतः प्रथमाधानग्निराद्ध्याद्ग्रजः कथं अग्रजातमतः कुर्याद्दग्निहोत्रं यथा
विधि आधानाधिकारिणि ज्येष्ठे नाहिताग्नावपि कनिष्ठस्तदनुमत्याधानं कुर्यादित्य
भिप्रायः अयं न्यायः पित्रादिष्वपि द्रष्टव्यः तथा चोशनाः पिता पितामहो यस्य अग्रजो वाथ
कस्यचित् तपोग्निहोत्रमंत्रेषु न दोषः परिवेदन इति यस्य कस्यचित्पितामहो वाग्रजो वा
हिताग्निर्न भवति तस्य तदनुमत्याधानादिकरणेपि न दोष इत्यर्थः एवमेव कन्यापरि
वेदनेपि दोषस्तदपवादो द्रष्टव्यो अधीतविस्मृतवेदो निराकृतिः तथा च देवलः अधी
त्य विस्मृतवेदमवेद्य द्विजो निराकृतिरिति नानाजातीया अनियतकृतयो गणास्तेषां
मध्यवर्ती गणान्यतमः कुशीलवो [?]गायकादिः वृषलीपतिस्तु रजस्वलायाः कन्या
याः पतिः तदुक्तं देवलेन वंध्यान्तु वृषलीं ज्ञेया वृषली च मृतप्रजा अपरा वृषली ज्ञेया

कदर्यश्च महषित्वा विवादकृत् दाम्भिको वर्धकी मत्तो मित्रकामाद दारदूषकः सद्भिश्च निंदिताचा
रः स्वकर्मापरिवर्जकः परिवित्तिः परिवेत्ता भृत्याचार्यो निराकृतिः शूद्राचार्यः सुताचा
र्यः शूद्रशिष्यस्तु नास्तिकः इत्थं स्मृतारकाचार्यो मानकृत्तैलिकस्तथा घोरवार्धुषिकाण्ड
शः परस्त्रीनां च दूषकः चतुराश्रमबाह्याश्च सर्वे ते पंक्तिदूषकाः इत्येते लिखलोके युक्तांस्त्वा
न्दृष्ट्वा न नियोजयेदिति विद्यादिगुणयोगे च केषां वर्जनीयं च तत्तोऽपरार्णोऽभिहितं
श्राद्धादिगुणयोगेऽपि नैतेन जातु कथंचन निमंत्रणीयाः श्राद्धेषु सम्यक्फलमभीप्सतेति
तद्वद्गुणलाभात्प्रागेव सम्यक्परीक्ष्य एवं निमंत्रयीत तथा च हारीतः यत्नेनैवंविधं श्रा
द्धमाचरिष्यन्स्वर्वेद्युर्निमंत्रयेदिति असंभवे परेद्युर्निमंत्रयीत तथा च कूर्मः श्वो भवि
ष्यति मे श्राद्धं पूर्वेद्युरभिपूजयेत् असंभवे परेद्युर्वा यथोक्तैर्लक्षणैर्युतान् दैवतोपि
स्वः कर्ता स्मीति निश्चित्य दद्याद्विप्रान्निमंत्रयेत् निरामिषं सकृद्भुक्तं सर्वभुक्तजने गृ
हे असंभवे परेद्युर्वा ब्राह्मणांस्तान्निमंत्रयेदिति अत्र विशेषो मनुना दर्शितः पूर्वेद्युर्वा
परेद्युर्वा श्राद्धकर्मण्युपस्थिते निमंत्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितानिति वारा

स्वगश्च कृतघ्नाश्च तल्पगाः ब्रह्मघ्नाश्च सुरापाश्च स्तेना गोपाश्च कितवाः राष्ट्रकामा
स्तथोन्मत्ताः पशुविक्रयिणश्च ये मानकूटास्तुलाकूटाः कन्याकूटास्तथैव च कालो
पजीविनश्चैव वृत्तिविक्रयिणस्तथा दंडपूताश्च ये विप्रा ग्रामकूटपराश्च ये अगार
दाहिनश्चैव गरदा वनदाहकाः कुंडाशिनो देवलकाः परदाराभिमर्शकाः श्यावदंताः
कुनखिनः शिल्पिनः कुष्ठिनश्च ये वणिजो मधुहर्त्ता रोहस्पथमर्दकाः द्विजाः कन्यानां
दूषकाश्चैव ब्राह्मणानां विदूषकाः स्तवकाः प्रेषकाश्चैव कितवाश्च कुशीलवाः सम
यानां च भेत्तारः प्रदाने ये च बांधवाः अजाविका माहिषकाः सर्वविक्रयिणश्च ये धनुः
कर्त्ता दूतवृत्तिश्च वधूकृशस्य विक्रयी पांडुरोगी गंडमाली यक्ष्मी चभ्रामरी तथा वि
श्वनः कूटसाक्षी च दीर्घरोगी वृथाश्रमी पंडश्चोपपतिस्तश्च वृथा प्रव्रजितश्च यः यश्च
प्रव्रजिताज्जातः प्रव्रज्यावसितश्च यः तावुभौ ब्रह्मत्वं गत्वा वाहवैवस्वतो यमः राज्ञः
प्रेष्यकरोयश्च ग्रामस्य नगरस्य च सकृद्दायी वा ताशी केशविक्रयिणश्च ये त्रपकी
सीचवीरघ्नः गुरुघ्नः पितृदूषकः गोविक्रयी चडतीलः पूगानां चैव याजकः मद्यपश्च

6

वधूपानां दुर्गायै गुग्गुलुः प्रियः मंत्रस्तु धूपोयं देवदेवेशि घृतगुग्गुलुयोजितः गृहाण व
रदे मातर्दुर्गे देवि नमोस्तु ते श्रीखण्डगरुं नरो दत्वा गोसहस्रफलं भवेत् श्रीखण्डगुरुः कृष्णागुरुः
माहिषाख्यं घृतान्यकं दत्वा विल्वं मयापि वा वाजपेयफलं प्राप्य सूर्यलोके महीयते स

नथा ४२

कृष्णागरुधूपेन माहिषाख्येन मंगला शोधयेत्सापकालितं यथाग्निरिव कांचनं कृष्णा

प्राकृं समुद्य ये ४

गरुं सकर्पूरं चंदनं सिल्हकं तथा भगवत्यै नरो धूपमिमं दत्वा नराधिप। इह कामानवा
प्यान्त्यानु गौलोके महीयते भविष्ये घृतदीपप्रदानेन चंडिकां पूजयेन्नरः सोश्वमेधफ

ग।गो

लं प्राप्य दुर्गायास्तुँ [illegible] भवेत् तैलदीपप्रदानेन पूजयित्वा च चंडिकाम् वाजपेयफलं
प्राप्य मोदते सह किंनरैः मंत्रस्तु अग्निर्ज्योती रविर्ज्योतिः चंद्रज्योतिस्तथैव च ज्योतिषामुत्त
मो दुर्गे दीपोयं प्रतिगृह्यताम् शिवरहस्ये देदीप्यते सकनकोज्वलपद्मरागरत्नप्रभाभा
स्वरे गृहे नमयेविमाने दिव्यांगनापरिवृतो नयनाभिरामः यज्वाल्य दीपममलं भवने भवान्याः

बृ.की.
१७१

दीपप्रदानैर्योदद्याद्देवेषुब्राह्मणेषुच तेनदीपप्रदानेनस्वस्तयांगतिमाप्नुयात भविष्ये घृते
नकुरुशार्दूलह्यमावास्यांतुकार्त्तिके विशेषतोनवम्यांतुभक्त्याश्रद्धासमन्वितः यावंतं
दीपसंघातंघृतेनापूर्यबोधितं तावत्कल्पसहस्राणिदुर्गालोकेमहीयते भविष्ये गुड
खंडकृतान्नंचतथाशर्करयापिच घृतेनपरिपक्वान्नंदत्वाचब्राह्मणाःपदंस्यादितिशेषः
शाल्योदनेरसालंचपानेवदरंजंतथा यःप्रयच्छतिदुर्गायैसगच्छतिशिवालयं शिवा
दुर्गारसालासूपशास्त्रेईषदम्लदधिशर्करापयःसाधितेदुमरिचेलगालितंपिचनाश
मरुचिंनिहंतिवेमोदनेचकुरुतेरसालया पानकंवेषकेगौमल्लमनल्लवापानकं 5x
सुरभीकृते तदेवखंडमृद्वीकाशर्करासहितेपुनः साम्लेसुतीक्ष्णंसुहितंपानकंस्यान्नि
रत्ययं निरत्ययंतत्कालं अक्षपायसंयुक्तंशर्करासहितेनरः यःप्रयच्छतिदुर्गायैत १७१
स्यराज्यंकरेस्थितं कालिकापुराणे ग्राम्यिसोयरमान्नेचदधिचापिसशर्करं महादे

पाx२

2

काम्यकामो लभेत्कामं गतिकामस्तु सद्गतिं अकामस्तु तदाप्नोति यद्विष्णोः परमं पदं बृहद्यमः नतथावेदजप्येन
पापंनिर्दह्यते द्विजः ~~यथा सावित्रीजप्येन सर्वपापैः प्रमुच्यते~~ ५४

ब्रह्मवाक्यं कुर्वन्नोधीतपापानियेत्वांध्यायंतियाविनि उभेसंध्येननेषांहिविद्यतेदेविपातकं गाय
त्र्याश्चजपान्नास्तिदिविचेहचपावनं तथा यथाकथंचिज्जप्तैषादेवीपरमपावनी सर्वकामप्रदा
प्रोक्ताएवं कर्मभिस्तुनिष्फला वसिष्ठः विद्यातपोभ्यांसंयुक्तंब्राह्मणंजपनित्यकं सदापिपापकर्मा
णमेनोनप्रतियुज्यति यथाग्निर्वायुनोद्धूतोहविषाचैवदीप्यते एवंजप्यपरोनित्यंमंत्रयुक्तःसदा
द्विजः विष्णुधर्मोत्तरे गायत्रीजपतेयस्तुकल्यमुत्थायवैद्विजः यथासावित्रीजप्येनसर्वपापैः
प्रमुच्यते विष्णुधर्मोत्तरे गायत्रींजपतेयस्तुद्वौकालौब्राह्मणःसदा तयाराजन्सविज्ञेयःपंक्ति
पावनपावनः मनुवृहद्विष्णू योधीतेऽहन्यहन्येतांत्रीणिवर्षाण्यतंद्रितः सब्रह्मपदमाप्नोति
वायुभूतःखमूर्तिमान् वृहद्यमः सहस्रपरमांदेवींशतमध्यांदशावरां गायत्रींतुजपेन्नित्यंसर्व
पापप्रणाशिनीं व्यासगोभिलयो दशभिर्जन्मजनितंशतेनतुपुराकृतं त्रियुगंतुसहस्रेण
गायत्रीहंतिपातकं अग्निपुराणे दशकृत्वःप्रजप्तासारात्र्यह्नायत्कृतंलघु तत्पापंप्रणुद
त्याशुनात्रकार्याविचारणा शतजप्तातुसादेवीसर्वपापप्रणाशिनी सहस्रजप्तासादेवीमहा
पातकनाशिनी लक्षजप्येनसाप्येवंसप्तजन्मोपपातकं कोटिजप्येनविप्रर्षेयदिच्छतितदा

कृच्छ्रेतेनसप
मेनयज्ञमंत्र
मिर्वामस्त

प्रयात् यक्षविद्याधरत्वंवा गंधर्वत्वमथापिवा देवत्वमथविप्रत्वं भयान्निहतकंटकं योगिया

ज्ञवल्क्यः सप्तावर्तनपुनेद् हृदशभिः ष्ठापयेद्दिवं विंशावर्तात्प्रसादेवीनयतेचेश्वरालयं अष्टोत्त २२

शतंजप्त्वातारयेज्जन्मसागरात् जीर्णां नपश्यतिप्रायेजन्मभ्रसंहिदारुणं गायत्रींचजपेद्यो

ऽहिसोमवद्भ्राजतेऽहिसः अत्रवर्जापसंवो सहस्रपरमांदेवींशतमध्यांदशावरां गायत्रींच

जपन्नविप्रोनपापेनविलिप्यते कूर्मपुराणे सहस्रपरमांदेवींशतमध्यांदशावरां गाय

त्रींवैजपेन्नित्यंजपयज्ञःप्रकीर्तितः योगियाज्ञवल्क्यः दशविंशंशतंवापिगायत्र्याःपरि

वर्तयेत् अक्षरात्रिकृताद्वैवयायातंमुच्यतेऽहिसः तथा सोंकाराचतुराव्रताविज्ञेया

साशतात्तरा शताक्तरांसमावृत्य सर्ववेदफलंलभेत् गोभिलीयः कदाचिदपिनोविद्वा

न्गायत्रीमुदकेजपेत् गायत्र्यग्निमुखीप्रोक्ता तस्मादुत्थायतांजपेत् यज्ञलेप्यक्षवस्त्रेण

स्थलेचैवार्द्रवाससा जपोहोमस्तथादानं तत्सर्वंनिःफलंभवेत् गृहेषुतत्समंजप्यंगोष्ठे

शतगुणंभवेत् नद्यांशतसहस्रंतुअनंतंचाग्निसन्निधौ योगियाज्ञवल्क्यः आर्षंछंद

श्चदैवत्यंविनियोगंचब्राह्मणं शिरश्चैत्तरदैवत्यमाह्वानंचविसर्जनं ध्यानंजपप्रयोगंच